CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.R.B.
Coll. No. 775.

Title Gaṇapati-Pūjā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 375 Subject: Pauranic Rit.

Title: Gaṇapatistavarāja

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 8.8" by 5." Extent: 2 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

॥ॐश्रीगणेशायनमः॥ॐकारमाद्यंप्रवदंतिसंतोवाचःश्रुतीनामपियंगृणंति॥
गजाननंदेवगणानतांघ्रिंभजेहमर्धेंदुकृतावतंसं॥१॥पादारविंदार्चननित्पराणां
संसारदावानलभंगदक्षं॥निरंतरंनिर्गतदानतोयैस्तंनौमिविघ्नेश्वरमंबुजाभं॥२॥
कृतांगरागंनवपद्मकेनमत्तालिमालांमदपंकलग्नां॥निवारयंतंनिजकर्णता
लैःकोविस्मरेत्पुत्रमनंगशत्रोः॥३॥शंभोर्जटाजूटनिवासिगंगाजलंसमाद
यकरांबुजेन॥लीलानिराराद्धिवमर्चयंतंगजाननंभक्तियुतानजंति॥४॥कुमारमु
क्तौपुनरात्महेतोःपयोधरौपर्वतराजपुत्र्याः॥प्रक्षालयंतंकरशीकरेणमौग्ध्येन
तंनागमुखंनमामि॥५॥तूर्णंसमुद्धृत्यगजास्यहस्तंयेशीकराःपुष्कररंध्रमुक्ताः
॥व्योमांगणेतेविचरंतितारःकालात्मनामौक्तिकतुल्यभासः॥६॥क्रीडारतेवा
रिनिधौगजास्येवेलामतिक्रामतिवारिपूरे॥कल्पावसानंपरिचिंत्यदेवाःकैला
सनाथंश्रुतिभिःस्तुवंति॥७॥नागाननेनागकृतोत्तरीयेक्रीडारतेदेवकुमारसंघैः॥

त्वयिप्रणंकालगतिंविहायतौप्रापतुःकंदुकतामिनेंदू॥८॥मदोल्लसत्पंचमुखैरजस्र
मध्यापयंतंसकलागमार्थान्॥देवानृषीन्[illegible]भक्तजनैकमित्रंहेरंबमर्कारुणमा
श्रयामि॥९॥पादांबुजाभ्यामतिवामनाभ्यांकृतार्थयंतंकृपयाधरित्रीं॥अकारणंका
रणमाप्तवाचांतन्नागवक्त्रंनजहातिचेतः॥१०॥येनार्पितंसत्यवतीसुतायपुराणमा
लिख्यविषाणकोट्या॥तंचंद्रमौलेस्तनयंतपोभिराप्यमानंदघनंनमामि॥११॥
पदंश्रुतीनामपदंस्तुतीनांलीलावतारंपरमात्ममूर्तेः॥नागात्मकोवापुरुषात्मको
वेत्यवेद्यमाद्यंभजविघ्नराजं॥१२॥पाशांकुशौभग्नरदंत्वभीष्टंकरैर्दधानंकररंध्र
मुक्तैः॥मुक्ताफलाभैःपृथुशीकरौघैःसिंचंतमंगंशिवयोर्भजामि॥१३॥अनेक
मेकंगजदंतमेकंचैतन्यरूपंजगदादिबीजं॥ब्रह्मेतियंब्रह्मविदोवदंतितंशंभुसू
नुंशरणंभजामि॥१४॥स्वांकस्थितायानिजवल्लभायामुखांबुजालोकनलोलने
त्रं॥स्मेराननाब्जंमदवैभवेनरुद्धंभजेविश्वविमोहनंतं॥१५॥येपूर्वमाराध्यगजा

नंतं त्वां सर्वाणि शास्त्राणि पठंति तेषां ॥ त्वत्तो न्यचान्य स्मृति पाद्य मेतैस्तः दस्ति चे
सर्वम सत्यकल्पं ॥१६॥ हिरण्यगर्भं जगदीशितारं कविं पुराणं रविमंडलस्थं ॥ गजान
नं यः प्रविशंति संतस्तत्कालयोगैस्तमहं प्रपद्ये ॥१७॥ वेदांतगीतं पुरुषं भजेहमा
त्मानमानंदघनं हृदिस्थं ॥ गजाननं यन्महसाजनानां विघ्नांधकारो विलयं प्र
याति ॥१८॥ शंभोः समालोक्य जटाकलापे शशांकखंडं निजपुष्करेण ॥ स्वभग्नदंतं
प्रविचिंत्य मौग्ध्याद्दाकष्टुकामः श्रियमातनोतु ॥१९॥ विघ्नार्गलानां विनिपातनार्
थं यन्नालिकेरैः कदलीफलाद्यैः ॥ नारयंत मदवारणास्यं प्रपुनरानिष्टमदंभ
जेनं ॥२०॥ यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं गजराजवक्त्रं ॥ स्तुत्यानया ये वि
धिनास्तुवंति ते सर्वलक्ष्मीनिधयो भवंति ॥२१॥ ॥इति श्रीगणपतिस्तवराजं